# Shri Bala Ashtottarashatanama Stotram 3

# श्रीबालाष्टोत्तरशतनामस्तोत्रम् ३

## Document Information

Text title : Shri Bala Ashtottarashatanama Stotram 3

File name : bAlAShTottarashatanAmastotram3.itx

Category : devii, dashamahAvidyA, devI, aShTottarashatanAma

Location : doc_devii

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : bAlAsaparyA saparyAkrama-nAmAvalI-stotrAdisaNgrahaH

Latest update : March 21, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 22, 2020

*sanskritdocuments.org*

# श्रीबालाष्टोत्तरशतनामस्तोत्रम् ३

ॐ ऐं ह्रीं श्रीं -
अणुरूपा महारूपा ज्योतिरूपा महेश्वरी ।
पार्वती वररूपा च परब्रह्मस्वरूपिणी ॥ १॥

लक्ष्मी लक्ष्मीस्वरूपा च लक्षा लक्षस्वरूपिणी ।
गायत्री चैव सावित्री सन्ध्या सरस्वती श्रुतिः ॥ २॥

वेदबीजा ब्रह्मबीजा विश्वबीजा कविप्रिया ।
इच्छाशक्तिः क्रियाशक्तिः आत्मशक्तिर्भयङ्करी ॥ ३॥

कालिका कमला काली कङ्काली कालरूपिणी ।
उपस्थितिस्वरूपा च प्रलया लयकारिणी ॥ ४॥

हिङ्गुला त्वरिता चण्डी चामुण्डा मुण्डमालिनी ।
रेणुका भद्रकाली च मातङ्गी शिवशाम्भवी ॥ ५॥

योगिनी मङ्गला गौरी गिरिजा गोमती गया ।
कामाक्षी कामरूपा च कामिनी कामरूपिणी ॥ ६॥

योगिनी योगरूपा च योगज्ञाना शिवप्रिया ।
उमा  कात्यायनी चण्डी अम्बिका त्रिपुरसुन्दरी ॥ ७॥

अरुणा तरुणी शान्ता सर्वसिद्धिः सुमङ्गला ।
शिवा च सिद्धमाता च सिद्धिविद्या हरिप्रिया  ॥ ८॥

पद्मावती पद्मवर्णा पद्माक्षी पद्मसम्भवा ।
धारिणी धरित्री धात्री च अगम्या गम्यवासिनी ॥ ९॥

विद्यावती मन्त्रशक्तिः मन्त्रसिद्धिपरायणा ।
विराड् धारिणी धात्री च वाराही विश्वरूपिणी ॥ १०॥

परा पश्याऽपरा मध्या दिव्यनादविलासिनी ।

नादबिन्दुकलाज्योतिः विजया भुवनेश्वरी ॥ ११॥

ऐङ्कारी च भयङ्कारी क्लीङ्कारी कमलप्रिया ।
सौःकारी शिवपत्नी च परतत्त्वप्रकाशिनी ॥ १२॥

ह्रीङ्कारी आदिमाया च मन्त्रमूर्तिः परायणा ॥ १३॥

इति श्रीबालाष्टोत्तरशतनामस्तोत्रं (३) सम्पूर्णम् ।

Proofread by PSA Easwaran

---

*Shri Bala Ashtottarashatanama Stotram 3*

pdf was typeset on March 22, 2020

Please send corrections to *sanskrit@cheerful.com*